श्रीडिंडवाणनगरे किलवत्स्यगोत्रो व्यासो बभूव फलदः फलदोनुगानां ।
प्रीत्या सदा पुरजनैः परिपूज्यमानः शुभ्रैर्यशोभिरमलीकृतचंद्रबिंबः ॥१॥
बभूव भूमौ भवभूतितुल्यः श्रीकेल्हणोनाम तदात्मजश्च ।
येन स्वबुद्धेः किल वैभवेन वशीकृता राजसभासु सर्वैः ॥ २ ॥
तस्यात्मजः सर्वगुणैकधामा श्रीरंगनामा क्षितिदेववर्यः ।
बभूव भूया लकलध्वमानः सित्पतितम्नानाविधूतपापः ॥ ३ ॥
तस्यात्मजौ कीर्त्तिकरौ पितृणां कौजूस्तथा वृद्ध इति प्रसिद्धौ ।
गोविंदपादांबुजसेवनोत्सुकौ वेदागमाचारपरावभूतां ॥ ४ ॥
श्रीभागवतभावार्थव्याख्याने श्रीधरोय(पमः)मवृद्धः ।
व्यासो भवद्बहुमाननीयो दिने दिने ॥ ५ ॥

वैश्वदेव विशुद्धात्मा तीर्थाटनपरायण ।
वृद्धव्यासो भवद्योग्यो लोककल्याणकारकः ॥ ६ ॥
तस्यात्मजास्त्रयोनातानिंवादित्यो विदांवरः ।
तथा रामऋषि(ः)र्धीमान् हरिवंशस्तथावरः ॥ ७ ॥
तेषां माता महाभागा नामतो गोमती बभौ ।
हेमदानपरानित्यं विप्राणां भोजनप्रदाः ॥ ८ ॥
चक्रे रामऋषिर्विद्वान् वृद्धव्यासात्मनः सुधीः ।
नालोदयीमिमां टीकां शुद्धां यमकबोधिनिं ॥ ९ ॥
टीकांविना बुधाव्याख्यां कृत्वा नालोदयीं इमां ।
व्याख्याने यमकानां तु श्रमं ज्ञास्यथ मामकं ॥ १० ॥
यद्विस्मृतं भ्रांतिवशात् कृतं वा विचार्य तन्मे सुधियो महांताः ।
कृपालवः कीर्तिकृतः कवीना परोपकाराः किल शोधयंतु ॥ ११ ॥
केतकानां सुपुष्पाणां बुधाः कंटकिनामपि ।
सौरभं न(त्य)जंत्येव महांतो हि गुणग्रहाः ॥ १२ ॥
वेदांगरसचंद्राख्येवर्षे मासे तु माधवे ।
शुक्लपक्षे तु सप्तम्यां गुरौ पुष्ये तथोडुनि ॥ १३ ॥
सुरत्राणे तथा साहिसल्येमे(सलेमे)शासति क्षितिं ।
पत्तनाख्ये महद्दूर्गो (महादुर्गे) राजसल्ये च राजनि ॥ १४ ॥
युवराजे भोजराजे टीकेयं पूर्णतामगात् ।
कृता रामऋषिमिश्रेण वृद्धव्यासस्य सूनुना ॥ १५ ॥

इति श्रीवृद्धव्यसात्मज रामऋषिविरचितायां महाकाव्य नलोदय-टीकायां यमकबोधिन्यां नलराज्यप्राप्तिर्नाम चतुर्थः आश्वासः समाप्तः ४ श्रीरस्तु रसा ६ चला १ र्षि ७ मायुते विहाय नेतुमासिवै शुचौ सिते च पक्षके तिथौ हि पक्षतौ रवौ ॥ १ ॥

अखिलिछिवनाथ इवं हिदृशो नि पठाय च वै भवस्तु त्वरितां ।
वसुदेवसुतस्य परेधिन यं किलल केशवशर्मसुतः सुमतिः युग्मं ॥
मंगलं लेखकानां च पाठकानां च मंगलं ।
मंगलं सर्वभूतानां भूयात् कृष्णप्रसादतः ॥
शर्मातं ब्राह्मणस्योक्तौ वर्मातं क्षत्रियस्य च ।
गुप्तांतं चैव वैश्यस्य पादांतं शूद्रजन्मनः

इति मस्तु । स्तुतिः मिति ज्येष्ट सुदि ६ रविवासरे संवत् १८५२ साके १७१७
इदं पुस्तकं लिप्यकृतं संपूर्णं १ श्रीराधाकृष्णाय नमः ॥

References.— 1 Aufrecht Catalogus Catalogorum, 1, 280[a] ; iii, 60[b].
All the Mss. of Ramarṣimiśra's commentaries referred to by Aufrecht are from this library only.

नलोदयकाव्य	Nalodayakāvya
with	with
यमकबोधिनी	Yamakabodhinī
No 311	336. / 1895–98.

Size.— 9⅘ in. by 4⅕ in.

Extent.— 47 leaves ; 14–15 lines to a page ; 36 letters to a line.

Description.— Country paper ; old and brittle ; Devanāgarī characters ; hand-writing clear, legible and uniform ; borders in black lines ; red pigment occasionally used for verses and yellow for corrections.

The Ms. contains only 1–3 Āśvāsas.

Age.— The Ms. is old.

Author of the text.— Ravideva.

" " " Comm.— Rāmarṣi.

Begins.—folio. 1[b]

Text हृदय सदा etc.......as in No. 305

Com श्रीगणेशाय नम ॥ प्रणम्य परमानंदं यदुनंदनमाश्रितः ॥
नालोदयी मया टीका यथामति वितन्यते ॥ १ ॥ etc. ......
... ... as in No. 310

folio—16[a] इति रामऋषिविरचितायां यमकबोधिन्यां नलोदयटीकायां दमयंती-
स्वयंवरो नाम प्र(थ)म आश्वासः ॥

folio—35[a] इति etc. ...... वसंतक्रीडावर्णनं नाम द्वितीय आश्वासः ॥

Ends.— folio. 47^b

Text पदापदाप विभ्रमनयेन या पदा पदा ।
बनाबना वनाथवत् सजीवना वनाभवत् ॥ ५४ ॥

Com. सा दमयंती अनाथवत् अभवत । यथा कश्चिदनाथस्तदा जातः सा काया आपदा हेतुभूतया विपत्या हेतुभूतया नावनौ आरण्यभूमौ पदाचरणेन परिभ्रमं आपत् प्राप्तवती । किं लक्षणायादभयवती । अभ्राणावा । अपदा अस्थाना वा । किं लक्षणा सा नयेन नीत्या उपलक्षिता । उपलक्षणे तृतीया । पुनः किं लक्षणा या । सजीवना वना । जीवना वनेन जीवनरक्षणेन सह वर्त्तमाना ॥ ६४ ॥

इति रामऋषिश्वक्रे महाकाव्ये नलोदये ।
आश्वासस्य तृतीयस्य टीकां यमकबोधिनीं ॥ १ ॥
इति श्रीमद्रामऋषिविरचितायां यमकबोधिन्यां श्रीरविदेवविरचित महाकाव्य नलोदयटीकायां दमयंतीविलापो नाम तृतीय आश्वासः ॥ ३ ॥
श्री· श्री ॥

References.— See No. 305

नलोदयकाव्य	Nalodayakāvya
with	with
यमकबोधिनी	Yamakabodhinī
No. 312	310. / 1884-86.

Size.— 10 in. by $4\frac{1}{8}$ in.

Extent.— 30 leaves; 5 & 12 lines to a page; 28 & 36 letters to a line.

Description.— Country paper; old but well-preserved; Devanāgarī characters; hand-writing clear, legible and uniform; पृष्ठमात्राs used; this is a पञ्चपाठी Ms. having text in the middle with the comm. all around it; borders ruled in triple and double red lines.

Age.— Saṁvat 1774.

Author of the text.— Ravideva.

" " " Comm.— Rāmarsi.

Begins.—folio 1ᵇ

॥ ďº0 ॥ श्रीअर्हद्भारतीभ्यां मनः ॥

Text हृदय सदा etc....... as in No. 305

Com. ॥ ďº0 ॥ श्रीगणेशाय नमः ॥ ॐ नमः ॥

प्रणम्य परमानंदं यदुनंदनमादितः ।

नालोदयी मया टीका यथाविधि वितन्यते etc.... as in No. 310

folio 10ᵃ इति श्रीमद्रामऋषिविरचितायां यमकबोधन्यां रविदेवविरचित-महाकाव्य नलोदयटीकायां दमयंतीस्वयंवरो नाम प्रथम आश्वासः ॥ १ ॥

folio 18ᵇ इति etc. .... वसंतक्रीडावर्णनो नाम द्वितिय आश्वासः ॥२॥

folio 25ᵃ इति etc. .... दमयंतीविलापो नामस्तृतीयः आश्वासः ॥ ३ ॥

Ends.— folio 30ᵃ

Text अरिसंहतिरस्य etc....... as in No. 305

followed by इति श्रीरविदेवकविविरचिते नलोदययमककाव्ये महाकाव्ये चतुर्थ आश्वासः ॥ ४ ॥ श्रीरस्तु ॥ समाप्तो नलोदय ॥ संवत् १७७४ वर्षे लेखि ॥

Com. अयं नलः संपदं लक्ष्मीं etc. ..... up to प्राप्तवानित्यर्थः as in No. 310

followed by श्रीडिंडवाणनगरे etc. ...... up to वृद्धव्यासस्य सूनुना ४५ as in No. 310

followed by इति वृद्धव्यासात्मज मिश्ररामऋषिदाधीत्य विरचितायां रविदेवविरचितमहाकाव्यनलोदयटीकायां यमकबोधिन्यां नलराज्यप्राप्तिनाम चतुर्थः आश्वासः समाप्तः शुभराज्यस्तु ॥

References.— See No. 310

नलोदयटीका Nalodayaṭīkā
called called
यमकबोधिनी Yamakabodhinī

No. 313 **36.**
1873–74.

Size.— 10 in. by $4\frac{1}{4}$ in.

Extent.— 46 leaves; 15 lines to a page; 42 letters to a line.

Description.— Country paper; old and discoloured; Devanāgarī characters, hand-writing clear, legible and uniform पृष्ठमात्राs used; borders ruled in two double black lines and edges in double; square spaces in the centre of folios with a few letters.

Age.— Samvat 1752.

Author.— Rāmaṛṣi.

Begins.— folio 1[b]

॥ ई० श्रीजिनाय नमः ॥

प्रणम्य परमानंदं यदुनंदनमादितः ।
नालोदयी मया टीका । यथामति वितन्यते ॥ १ ॥ etc. ...
as in No. 310

folio 14[b] इति श्रीमद्रामऋषिविरचितायां नलोदयव्याख्यायां यमकबोधिनीसमाख्यायां दमयंतीस्वयंवरो नाम प्रथम आश्वासः ॥ १ ॥ श्रीः ॥

folio 27[b] इति etc. ... ... वसंतक्रीडावर्णनो नाम द्वितीय आश्वासः ॥२

folio 37[a] इति etc. ... ... दमयंतीविलापो नाम तृतीय आश्वासः ॥३॥

Ends.—folio 46[a]

अयं नलः संपदं लक्ष्मीं etc. ... ... up to प्राप्तवानित्यर्थः as in No. 310 followed by इति श्रीमन्महाकविरविदेवविरचिते नलोदयाभिधे काव्ये चतुर्थ आश्वासः ॥ ४ ॥

श्रीडिंडवाणनगरे etc. ... ... up to वृद्धव्यासस्य सूनुना १७
as in No. 310

followed by इति श्रीमद्रामऋषिविरचितायां नलोदयव्याख्यायां यमकबोधिनीसमाख्यायां नलराज्यप्राप्तिर्नाम चतुर्थ आश्वासः ॥ ४ ॥

शराग्निमुनिभूयुक्ते वत्सरे दक्षिणायने ।
शुचौ मासे शुचौ पक्षे द्वादश्यां भृगुनंदने ॥१॥
जशवंते नृपाधीशे शासति क्षितिमंगलं ।
टीकेयं हरिदेवेन भूदेवेन लिपीकृता ॥ २ ॥

युग्मम् ॥ संवत् १७५२ वर्षे मिती आसूवदि ७ दिने लिपीचक्रं ॥

References.— See No. 310

नलोदय	Nalodaya
with	with
टिप्पण	Tippaṇa
No. 314	410. 1887-91.

Size.— $10\frac{2}{5}$ in. by $4\frac{2}{5}$ in.

Extent.— 19 leaves ; 7-8 lines to a page ; 34 letters to a line.

Description.— Country paper ; old and brittle ; Devanagari characters ; hand-writing of the text bold and of the tippaṇa very small ; borders ruled in double black lines ; red pigment used for verse-numbers and yellow for corrections.

Ṭippaṇi is written between the lines and in the margin. In the last colophon the text is ascribed to one केशवादित्य.

Age.— Samvat 1684.

Author.— Kālidāsa.

Begins.— folio. 1[b]

रामकृष्ण ॥ हृदय सदा etc. ... ... as in No 305

इति श्रीकालिदासकृतौ नलोदयमहाकाव्ये प्रथम सर्ग समाप्तः ॥

इति etc. ... ... द्वितीयः सर्गः ॥ २ ॥

इति etc. ... ... तृतीयः सर्गः ॥

Ends.— fol. 19a

अरिसंहतिरस्य etc. ... ... up to संपदं ॥ ४७॥
as in No. 305

followed by इति श्रीकेशवादित्यविरचिते नलोदये महाकाव्ये चतुर्थो सर्ग्ग समाप्तः ॥ ४ ॥ संवत् १६८४ वर्षे माघसुदि प्रतिपदा रविदिने ॥ लिखितं केशवब्राह्मण सासनवूलहरप्रधानमथुरायां बगाली घाटेतिंदुकनाम-तीर्थे हरिकेशस्य स्थले स्वपाठार्थं वा परोपकाराय ॥ श्रीराम ॥ श्रीकृष्णो जयति शुभ भूयात् ॥

तैलात् रक्षं जलात् रक्षं । etc.

References.— See No 305

नलोदयकाव्य
with
अवचूर्णि

No. 315

Nalodayakāvya
with
Avacūrṇi

712.
1886-92.

Size.— $10\frac{2}{5}$ in. by $4\frac{2}{5}$ in.

Extent.— 9 leaves; 11 lines to a page and 44 letters to a line (Text)
12-13 ,, ,, ,, ,, ,, 60 ,, ,, ,, ,, (Com.)

Description.— Smooth country paper; very old but well-preserved; Devanāgarī characters, hand-writing of the comm. very small but clear, legible and uniform; पृष्ठमात्राs used; borders ruled in triple red lines; this is a पञ्चपाठी Ms.; square blank spaces in the middle of folios and also in the margins; fol. 9 slightly moth-eaten.

Age.— Saṁvat 1494.

Author of the text.— Ravideva.
,, ,, ,, comm.— Not mentioned.

Begins.—folio. 1a

॥ ६० ॥ ॐ नमो वीतरागाय

Text— हृदय सदा etc. ... ... as in No. 305

Com.— ॥ ६० ॥ हे हृदय । सदा सर्वदा यादवतः श्रीमन्नारायणात् । मा गाः पृथग् मा भूः ॥ किं लक्षणात् यादवतः पापाटव्या । दवतः etc.

folio 3[a] इति नलोदये काव्ये प्रथमोल्लासः समाप्तः ॥

folio 5[b] इति नलोदय महाकाव्ये द्वितीयोल्लासावचूर्णिः समाप्ता ॥

folio 7[b] इति तृतीयोल्लासः

Ends.— folio. 9[b]

Text— अरिसंहतिरस्य etc. up to संपदं ॥ ४४ ॥ as in No. 305 followed by इति नारायणसुतश्रीरविदेवाविरचिते नलोदयमहाकाव्ये चतुर्थोल्लासः समाप्तः ॥ श्री ॥

Com— नलः सदा सर्वदा अयं संपदं अहासू अगच्छत् किं विशिष्टः अयं नलः उन्महा उद्धततेना किं संपदं महामहां महोत्सवां को भावः । नलस्तां पुरीं पुनरपि प्राप्तः पुनः संपदं लक्ष्मीं प्राप्त इति भावः ॥ ४७ ॥

इति नलोदयकाव्याऽवचूर्णिः समाप्ता सं. १४९४ वर्षे फा. शुदि त्रियोदस्यां

References.— Aufrecht mentions only two Mss. viz Nos. 712 and 713 of 1886-92.

नलोदयकाव्य
with
अवचूरि

Nalodayakāvya
with
Avacūri

No. 316

350.
1892-95.

Size.— $11\frac{4}{5}$ in. by $4\frac{2}{5}$ in.

Extent.— 5 leaves; 17 lines to a page; 60 letters to a line.

Description.— Country paper; old and thin; Devanāgarī characters; hand-writing small, but clear, legible and uniform; borders ruled in triple and double red lines; पृष्ठमात्रास used; decorations in the middle of the folios and also in the

margins ; edges of first two folios damaged ; this is a पञ्चपाठी Ms. red pigment used for verse-numbers and yellow for corrections.

Age.— The Ms. appears to be old.

Author of the text.— Ravideva.

,, ,, ,, comm.— Not mentioned.

Begins.— folio 1[a]

Text— ॥ ६० ॥ अर्हं ॥ हृदय सदा etc. as in No. 305

Com.— ॥ ६० ॥ अथास्य व्याख्या ॥ दवानलात् ॥ दायादौ सुतबांधवौ ॥ १॥ पुरुषास न गोपीसकाशात् ॥ आभीरोहृष्टिपीतः ॥ अराक्षि । अपराधमपि प्राप्तः ॥ २ ॥ etc.

folio 2[a] इति नलोदये प्रथमाश्वासावचूरिः ॥

folio 3[b] इति नलोदये द्वितीय आश्वासवचूरिः ॥

folio 4[a] तृतीय आश्वासावचूरिः ॥

Ends.— folio. 5[b]

Text— अरिसंहतिरस्य etc. up to संपदं ॥४७॥ as in No 305 followed by इति नारायणसुतश्रीरविदेवविरचिते नलोदये चतुर्थ आश्वासः ॥

श्रीः ॥ शुभं भूयात् ॥ चिरं नदनात् ॥ कल्याणमस्तु ॥ श्रीरस्तु ॥

Com— विस्तीर्णा उद्गततेजा ॥ धौढांस्तवां ॥ अगमत् ॥ ४७ ॥

इति नलोदये चतुर्थाश्वासावचूरिः ॥ श्रीः शुभमस्तु ॥ कल्याणमस्तु ॥

References.— Auf. Cat. Cat. iii, 60[b].

नलोदयकाव्य
with
टीका सुबोधिनी

Nalodayakāvya
with
Comm. Subodhinī

No. 317

711.
1886-92.

Size.— 13⅜ in. by 5½ in.

Extent.— 65 leaves ; 11–12 lines to a page ; 40 letters to a line.

Description.— Country paper ; white in appearance , Devanagarī characters ; hand-writing clear and legible , text in the middle with the comm. above and below it , borders ruled in two double black lines ; folios numbered in both margins.

Age.— The Ms. is not very old.

Author of the text.— Kālidāsa.

,, ,, ,, comm.— Prajñākaramiśra.

Begins.--folio 1[b]

Text— हृदय सदा etc. as in No 305

Com.— श्रीगणेशाय नमः ॥

कंकणफणिराजमणिं दीपधिया वदनमारुतैरसकृत ।
निर्वापयति कुमारे सगिरिसुतो जयति सस्मितः शम्भुः ॥ १ ॥
नलोदयस्य सहसा दुरूहस्य सुबोधिनीम् ।
क्रियमाणस्य मे कुर्वद्रूपोस्तु शरणं शिवः ॥ २ ॥

तत्रभावान्कालिदासः प्रारीप्सितग्रन्थसमाप्तिप्रतिबन्धकाविघ्नविधाताय श्रीकृष्णस्मरणरूपमंगलमादौ निबध्नाति हृदयेति हे हृदय अन्तःकरण यादवतः यादवात्पंचम्यास्तसिल् त्वं मा गाः मा गच्छ etc.

folio 12[b] इति श्रीनलोदयटीकायां सुबोधिन्यां प्रथमोल्लासः ॥१॥

folio 28[a] इति etc. ... ... द्वितीयोल्लासः

folio 47[b] इति etc. ... ... तृतीयोल्लासः

Ends.— folio 65[ab]

Text— अरिसंहतिरस्य etc. up to संपदं as in No. 305.

followed by इति श्रीकालिदासकृते नलोदये सत्काव्ये चतुर्थोल्लासः समाप्तः

Com.— अयन्नलः उन्महा उद्भततेजाः सदा सर्वकालं संपदं लक्ष्मीमहास्त प्राप । कीदृशीं संपदं महामहाम् महान्तमह उत्सव यस्यां सा तां सदैवात्सर्वपरिपूर्णां संपदं लेभे इति भावः अनायतेति तनुविस्तारे इत्यस्माद्धातोः कर्मणि-लिङि आत्मनेपदे यकि च कृते तनोतेर्यकीति विकल्पेनात्वे रूपम् अहास्तेति

ओहाङ्गतौ इत्यस्माद्ये गत्यर्थास्ते प्राप्त्यर्था ज्ञानार्थाश्चेति वचनेन प्राप्त्यर्थो- लुङि आत्मनेपदे ते परेसि कृते रूपम् पूर्यतेति दीर्घपाठे पूः पुरीयता प्राप्ता कथंभूता आयता विशालेत्यर्थः इतीति इति समाप्तौ कालिदासेति कविनाम- कथनम सत्काव्य इति महाकाव्यभिन्नत्वसूचनम् उच्छ्वास श्वाससाध्यः परि- छन्दः समाप्त इत्यर्थ·

मिश्रानन्दाकरस्त्वासीन्महोपाध्यायलक्षितः ।
पुण्यग्रामसभाजेता यष्टा वाणिमय· सुधीः ॥
वेदेनैव विधिं कविं नयकृतैस्तर्केण वाचस्पतिं ।
वेदान्तेन शिव(वं) मनुस्मृतिमैर(यै)र्ज्योतिश्च यैर्भास्करं ॥
व्याकृत्येन फणाधरं क्षितिधरं नागाधिपं चंदसा ।
घर्मो यस्य विजेतुमंचति पर सांख्येन चार्वाकपं ॥
तत्सूनुः सुकृती क्षितीश्वरकृपापात्र· सुहृत्पालको ।
नानाशास्त्ररतो महापदयुतोपाध्यायसंज्ञान्वित ।
मत्तर्कायतकाननोयतवलद्वाद्दन्द्रिदन्तावल–॥
श्रेणीमर्दनचातुरीचणहरी **विद्याकरो** मैथिलः ॥३॥
तस्यात्मजोभूद्विबुधाग्रगंता **प्रज्ञाकरः** सज्जनतापहन्ता ।
गुणालय(ः) श्रीशपदानुमन्ता शास्त्रेषु दक्षः कुधियां नियन्ता ॥४॥
स्वल्पेन वयसा तेन कृता टीका **सुबोधिनी** ।
पूर्वाचार्यकृतीर्वीक्ष्य सुधियां पश्यतां मुदे ॥ ५ ॥

इति श्रीमैथिलप्रज्ञाकरमिश्रप्रणीतायां **नलोदयटीकायां सुबोधिन्यां** चतुर्थ उच्छ्वासः ॥४॥ समाप्तेयं सुबोधिनीटीका ॥

References.— Aufrecht–Catalogus Catalogorum :— i, 280[a]; ii, 60[b]; iii, 60[b].

For described Mss. see Rajendralal Mitra, Notices, Vol. X, No. 3394 and Mad. Cat. Vol. XX, No. 11847.

Published by Anant Ramkrishna Kalashikar, Bombay 1869.

नलोदयकाव्य	Nalodayakāvya
with	with
टीका सुबोधिनी	Comm. Subodhinī
No. 318	366. / 1884-87.

Size.— $9\frac{4}{5}$ in. by $4\frac{2}{5}$ in.

Extent.— 46 leaves; 17-18 lines to a page; 38 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing clear, legible and uniform; borders ruled in two double black lines; red pigment used for प्रतीकs.

Age.— The Ms. appears to be old.

Author of the text.— Kālidāsa.

" " " comm.— Prajñākara Miśra. Cf. No. 317 above.

Begins— folio. 1ᵇ

Text— हृदय सदा etc. as in No. 305

Com.— ॥ O र्द ॥ श्रीगणेशाय नमः ॥

कंकणफणिराजमणिं दीपधिया वदनमारुतैरसकृत।
निर्वापयति कुमारे सगिरिसुतो जयति सस्मितः शंभुः ॥१॥

हृदयेति हे हृदय अंतः करण यादवतः यादवात् पंचम्यास्त सिद्ध । त्वं मा गाः मा गच्छ । etc. as in No. 317

folio 12ᵇ इति श्रीनलोदये महाकाव्ये श्रीकविकालिदासकृतौ नलदमयंती-स्वयंवरो नाम प्रथमोल्लासः ॥ ॥ सटिपणं च ॥

folio 23ᵇ इति etc. वसंतक्रिडावर्णनं नाम द्वितियोल्लासः ॥२॥

folio 36ᵃ इति etc. तृतीयोल्लासः ॥३॥ सटिप्पणंच ॥

Ends.—folio. 45, (46)

Text— अरिसंहतिरस्य etc. up to पदं as in No. 305

Com.— अयं नलः etc. up to सिच्चिकते रूपम् ॥४७॥ as in No. 317 followed by इति नलोदये महाकाव्ये श्रीकविकालिदासकृतौ सटीकायां चतुर्थोल्लासः प्रपूर्णः ॥

अदृष्टदोषान्मतिविभ्रमाद्वा यत्किंचिदूनं लिखितं मया यत् ।
तत्सर्वमार्यैः परिशोधनीयं कोप न कुर्युः खलु लेखकस्य ॥ १ ॥
श्रीविघ्नविनाशनाय श्रीगणपतये नमः ॥ लेखकपाठकयोर्मंगलमस्तु ॥
शुभमस्तु ॥

References — See No. 317

नलोदयकाव्य Nalodayakāvya
with with
जडावबोधिनी Jaḍāvabodhinī

No. 319 243. / Viśrāma (i).

Size.— 11⅖ in. by 4⅕ in.

Extent.— 15 leaves; 10-11 lines to a page; 42 letters to a line.

Description.— Country paper; not very old; Devanāgarī characters; hand-writing clear and legible; margins of some folios ruled in double red lines; red and yellow pigment occasionally used; incomplete.

Aufrecht gives the name of the author of the present Comm. as हरिरत्न. He also mentions him as हरिभट्ट. It is difficult to say whether the com. of हरिहरभट्ट (No. 322) is the same as this.

Age.— The Ms. is not very old.

Author of the text.— Kālidāsa.

" " " comm.— Haribhaṭṭa.

Begins.— folio. 1ᵇ

Text— हृदय सदा etc. as in No. 305

Com.— ॥ श्रीगणेशाय नमः ॥

काम्यानि पुण्यानि पुराकृतानि कात्यंतमुत्तुंगमनोरथा मे ।
तथापि ते कृष्णकथावलंबी विश्वं वशीकर्तुमहं समीहे ॥ १ ॥

नत्वा पदद्वंद्वमगेंद्रपुत्र्याः समीहितप्रर्थनकल्यवल्याः ।
हरिर्यथाभाविचारपूर्वं नलोदयद्योतानिकां तनोति ॥ २ ॥

निर्विघ्नग्रंथसमाप्त्यर्थं वासुदेवाचिंतनरूपं मंगलं शिष्यशिक्षार्थं ग्रंथे निबध्नाति ॥ हृदयेति ॥ कालिदासो हृदयोपदेशं करोति ॥ हे हृदय त्वं सदा-सर्वकालं तस्माद्यादवतः यादवादिति यादवतः श्रीकृष्णसकाशात् मा गा· अन्यत्र विषये मा गच्छ etc.

folio 11[a] इति श्रीमत हरिभट्टविरचितायां नलोदयटीकायां जडावबोधिन्यां प्रथमोल्लासः ॥

Ends.— folio. 15[b]

Text—(fol. 15[a]) नभसो विचरं कुसुमेक्षणमागतरो गतरोगतरोगतरो ।
वद् कांतमवेक्ष्य यथाद्यमथावरमेव रमे वरमेवरमे ॥ १९ ॥

Com.— केति का ललना तं दिवसं तस्मिन् दिवसे कुसुमशरं कंदर्पं असोढ । असहिष्ट न कोपीत्यर्थ· । किं कुसुमशरं हृदि अंतःकरणे अनादि बहुकालं यथा तथा वसंतं तं कं यत्र दिवसे अलिभिर्भ्रमरैः अनादिशाह्वित ॥ कि कृत्वा वसंतं दृष्ट्वा किं वसंतं संतं विद्यमानं भ्रमरैरभिलषणीयमित्यर्थः श्रितेति काम-नागतः सबंधुका ।

References.— See No. 322

नलोदयकाव्य
with
टीकाs

No 320

Nalodayakāvya
with
Commentaries

161.
1902–07.

Size.— $10\frac{1}{2}$ in. by $4\frac{1}{2}$ in.

Extent.— 43 leaves ; 11-12 lines to a page ; 43 letters to a line.

Description.— Country paper ; old in appearance ; Devanāgarī characters ; hand-writing clear, legible and uniform ; borders ruled in two double black lines ; red pigment used for verse-numbers ; edges slightly moth-eaten ; separate pagination for every Ullāsa.

The commentary on Ullāsa 1 is by नृसिंहाश्रम while the comm. on Ullasas 2-4 is by गोविन्दभट्ट The Ms. seems to have been copied at Benares, by one Rāmadāsa.

Age.— Saṁvat 1806.

Author of the text.— Kālidāsa.

,, of the comm.— Nṛsiṁhāśrama and Govindabhaṭṭa.

Begins.—folio. 1ª

Text— हृदय सदा etc. as in No. 305

Com.— श्रीरामाय नमः हृदयेति । हे हृदय हे चित्त सदा सर्वकाले सर्वावस्थायां च दुरासदाया· दुःसहाया पापानामटव्या· अरण्यस्य दवतो दवाग्नेः । etc. ... ...

folio. 11ª इति नृसीहाश्रमविरचितायां नलोदयटीकायां प्रथमोल्लासः ॥ १ ॥

folio 12ᵇ of 2 nd आश्वास.

इति श्रीमदात्रेयगोविंदभट्टविरचितायां टीकायां द्वितीयाश्वासः ॥ २ ।

folio 11ª of 3 rd आश्वास.

इति etc. ... ... तृतीयाश्वासः ॥ ३ ॥

Ends.—folio. 10ª of 4 th. आश्वास.

Text-- (fol 9ᵇ) अरिसंहतिरस्य etc. up to संपदं ४७ as in No. 305 followed by इति श्रीनलोदये महाकाव्ये कविश्रीकालिदासकृतौ चतुर्थोल्लासः समाप्त ॥ ४ ॥

Com.-- मा राज्यलक्ष्मीः तं नलं आयतप्रायां कस्मै प्रयोजनाय आयततमाय श्रेष्ठलाभाय किं भूतं ते यततं सावधानं कमिव जनाय लोकाय सुखदं हरिं विष्णुं यथैव यथा शब्दो(ब्दो) अत्र इवार्थे ४७

आत्रेयस्यैकगृहं बभूव भगवत्पादारविंदद्वया(यो)--।
शलंबे त्रिकुले सुभाषितगुणां माल्यः स पीतांबरः ॥
तस्माद्रव्यनिभातिभव्यभवताच्चातुर्यनव्यस्फुर-।
द्बुद्धिरंनल्पतपमां श्रीनागनाथाभिधः ॥ ४८ ॥
ततस्तस्यापत्यं प्रथितबहुविद्यापरिचयो ।
महादेवोहेवत्रिपुररिपुमाराध्य विधिवत् ॥
फलं लेभे लीलाविलसितकवित्वौतकजना ।
तयोर्गोविंदाख्यो व्यरचायदिमां । श्रेष्टपदभाक् ॥

इति श्रीगोविंदभट्टविरचितायां कालिदासविरचित नलोदयदीपिकायां चतुर्थ आस्वास समाप्तोयं नलोददीपिकाभिधो ग्रंथ· ॥ सुभमस्तु संवत १८०६ समैनामे भाद्रपदमासे शुक्लपक्षे दशम्ययां १० रविवासरे लिखितं पहलवान श्रीरामदासे(न) परअपकारार्थे योदेखा…लीखित मया मम दोषो न दीयते शुभस्थाने वरानसीमध्ये ५ श्रीरामार्ऽपणमस्तु ।

References.— For नृसिंहाश्रम's Comm. See No. 322

: Aufrecht's Catalogus Catalogorum Part I. page – 791[a] Part II, page— 206[b].

नलोदयकाव्य Nalodayakavya
with with
प्रकाशिनी Prakāśini

No. 321 351. 1892–95.

Size.— 11 in. by 4½ in.

Extent.— 14 leaves; 16–18 lines to a page, 64 letters to a line.

Description.— Country paper; old in appearance; Devanāgari characters; hand-writing very small but clear legible and uniform; yellow pigment used for corrections; right-hand corners of many folios moth-eaten; incomplete.

The Ms. contains first two sargas and 19 verses of the 3rd.

Age.— The Ms. appears to be old.

Author of the text.— Kālidāsa.

,, ,, the comm.— Śivadatta.

Begins.—folio. 1[b]

Text— हृदय सद्मा etc. as in No. 305

Com.— ॥ श्रीगणेशाय नमः ॥ श्रीमंगलमूर्त्तये नमः ॥
सोमं गिरिशं नत्वा कुर्वे टीकां नलोदयस्यैतां
भगवान्मिश्रतनूजो नाम्ना प्रकाशिनीं शिवदत्तः ॥ १ ॥

विलसन्नानायमकयुतिच्चरणरूहमहागूढस्य ।
निजबोधार्थे संतस्तदपि कृपया ॥ २ ॥ युग्मं ॥

तत्र तावन्निजग्रंथसिद्धये परमकारुणिक भगवतिविचित्रफलदामृतामित लीलारसार्णवेति चलाचलस्वमनसः स्थितिं प्रार्थयन्नार्य्यागीत्या छंदोयत-श्लोकचतुष्टयं कविराह ॥ हृदयेति । हे हृदय यादवतः कृष्णात्वं मा गाः दूरे मा गच्छतु तत्रैव वसेदित्यर्थः । etc.

folio 7^b इति श्रीनलोदयकाव्ये शिवदत्तकृतायां प्रकाशिनी टीकायां प्रथमः सर्गः ॥ १ ॥

folio 12^b इति etc. द्वितीय सर्ग्गः ॥

Ends.—folio. 13^b, (14^a)

Text— क्व भवान् सांसत्वापदमित्या प्रयोतिभ्रशं सत्वस्य ।
तं देशं सत्वस्य प्राप नलः सत्वरो भ्रशं सत्वस्य ॥ १६ ॥

Com.— ओ नल । अमुना अक्षेणावाससा कंचुकवस्त्रेण तरसा शीघ्रं ते वपुः शरीरं कल्पं रोगरहितं स्यात् वर्तो निरामयः क्वसत्तिकल्पं तेभ्यो नलयं नराः यशसा कीर्त्या कुर्वंति अगीक्रियंते ते नराः गुणोदयै गुणसमृद्धिभिः भूतिसाकल्यं भूतेः संपतेः साकल्यं सकलभावं दधति प्राप्नुवंतीत्यर्थः ॥ १९ ॥

Aufrecht mentions only this Ms. in his Catalogus Catalogorum, iii, 60^b.

नलोदयटीकाs
अन्वयदीपिका
and
भावबोधिनी

Nalodayaṭīkās
Anvayadīpikā
and
Bhāvabodhinī

No. 322

35.
1873–74.

Size.— $8\frac{3}{8}$ in. by $3\frac{1}{2}$ in.

Extent.— 45 leaves; 9-13 lines to a page; 35-40 letters to a line.

Description.— Country paper; old, brittle and discoloured; Devanāgarī characters; hand-writing clear and legible but not

uniform, borders ruled in double black lines; red pigment used for प्रतिरूs and yellow for corrections.

The Ms. contains two commentaries, one by नृसिंहाश्रम on 1–2 Ullāsas and the other by हरिहरभट्ट on 3–4 Ullāsas. The comm. of हरिहरभट्ट is also called बालबोधिनी.

Age.— Saṁvat 1683.

Author.— Nṛsiṁhāśrama and Hariharabhatta (Haribhatta Cf. Aufrecht Cat. Cat.).

Begins.—folio. 1[b]

॥ श्रीगणेशाय नमः ॥

नत्वा नृसिंहं जगदेकसाक्षिणं कृत्वा प्रणामं गुरवे महात्मने ।

स्तुत्वा गणेशं च गौरीसुतं प्रभुं ॥ करोमि टीकां च नलोदयस्य वै ॥१॥

नलोदयस्य काव्यस्य टीकेयं च प्रतन्यते ।

नृसिंहा......नमुनिना स्वबोधार्थं यथामति ॥ २ ॥

हृदयेति ॥ हे हृदय हे चित्त । सादासर्वदा यादवतः श्रीकृष्णात् मा गाः पृथक् मा भूः स तत्रैव निरंतरं रमस्वेत्यर्थः ॥ etc.

folio 20[a] इति श्रीनृसिंहाश्रमविरचितायां नलोदयटीकायां अन्वयदीपिकायां । प्रथमोल्लासः ॥

folio 32[b] इति etc. द्वितीय उल्लासः ॥

folio 39[a] इति श्रीहरिहरभट्टविरचितायां नलोदयटीकायां भावबोधिन्यां तृतीय उल्लासः ॥

Ends.—folio 45[a]

अरिसंहतिरित्यारभ्य प्रमाणिकावृत्तं । प्रमाणिका जरौगलाविति रत्नाकरः । प्रमाणिकाया एव नगरस्वरूपिणीति काचिन्नामांतरं । तथा च कालिदासः । द्विविषष्टेमष्टमंगुरुप्रयोजनं यथा तथा निवेदयंति ॥ तां बुधा नगरस्वरूपिणीमिति ॥ लघुगुरुनिरंतरेति पिंगलादौ ॥ ४७ ॥ इति श्रीहरिहरभट्टविरचितायां नलोदयटीकायां बालबोधिन्यां चतुर्थ उल्लासः ॥ श्रीरस्तु ॥ सं १६८३ मार्गशीर्ष शु ५ भौमे श्रीमज्जुजनगरे लिखितमिदं पुस्तकं व्याससनीदामाभिधानेन स्वपठनार्थं पुत्रपौत्राणां परोपकारार्थंच श्रीरस्तु शुभमस्तु लेखकपाठकयोः ॥ संवत् १६८३ लिखितमिदं ॥

References.— Aufrecht Catalogus Catalogorum, i, 280ª (Nṛsiṁha); ii, 60 C. by Nṛsiṁha; i, 280ª C Bālabodhinī.

A. S. B. Cat. Vol. II, No. 5018 describes a commentary by Nṛsiṁhāśrama.

नलोदयकाव्यटिप्पणी Nalodayakāvyatippaṇī

No 323 450. / 1895-1902.

Size.— $8\frac{1}{4}$ in. by 4 in.

Extent.— 66 leaves; 10-11 lines to a page; 25 letters to a line.

Description.— Country paper, old in appearance; Devanāgarī characters; hand-writing clear, and legible but not uniform; borders ruled in double black lines, folios 2-15, 18, 28, 29, 36-38, 43 and 48 missing; folios numbered in both margins.

Age.— The Ms. appears to be old.

Author.— Vināyaka.

Begins.—folio. 1ᵇ

श्रीगणेशाय नमः ।। श्रीसरस्वत्यै नमः ।। अविघ्नमस्तु ।

अतरायतमो दीपं गणनाथं प्रणम्य च ।

लक्ष्मीधरो विलिखति श्रीनळोदयटिप्पणीं ।।

प्रणम्य दुग्धाब्धिसुतां गजाननं सरस्वतीमल्पमतिप्रकाशकं ।

विनायकाख्यो विदधाति टिप्पणीं नळोदयस्यास्य सुदुस्तरस्य हि ।।१।।

इह खलु कृष्णकविः काव्यारंभसमये आशीर्नमस्क्रियावस्तुनिर्देशात्मक त्रिविधमंगळस्य मध्ये हृदयस्य वासुदेवस्मरणानुशासनलक्षणामाशीरूपं मंगळं विधत्ते ।। ।।

हृदय सदा यादवतः पापाटव्या दुरासदायादवतः ।

अरिसद्मदायादवतक्षि etc.

folio 24ᵇ इति वैनायकीये नळोदयटिप्पणे प्रथमाश्वासः ।। छ ।।

folio 47^a इति etc. द्वितीयोश्वासः ॥
folio 70^a इति etc. तृतीये उच्छ्वास ॥ ३ ॥

Ends.— folio. 88^b

अयं उन्महा उत्कृष्टतेजा नळः माहामहां महोत्सवां संपदं सदा अहास्त ॥ प्राप ॥ हो हाङ्‌तावित्यस्य लुङिरूपं ॥ ४ ॥

इति श्रीवैनायकीये नळोदयटिप्पणे चतुर्थोश्वास छ ॥ ४ ॥

आषाढे मासि श्रीनामसवत्सरे आषाढ शुक्लपक्षे गोविंदेन लिखितं ॥ श्रीवक्रतुंडार्पणमस्तु ॥ लेखकपाठकयोः शुभं भवतु ॥ श्रीसदाशिवाय नमः ॥ श्रीरामाय नमः ॥

Aufrecht does not mention this commentary in his Catalogus Catalogorum.

नलोदयकाव्यावचूर्णि

Nalodayakavyavacurni

No. 324 713. 1886-92.

Size.— $9\frac{3}{4}$ in. by $3\frac{4}{5}$ in.

Extent.— 16 leaves; 15 lines to a page; 50 letters to a line.

Description.— Country paper; old and discoloured; Devanāgari characters; hand writing small but clear, legible and uniform; borders ruled in two double black lines; right-hand edges of folios extremely damaged; some portion is scratched out.

Age.— Saṁvat 1717.

Author.— Not mentioned.

Begins.— folio. 1^b

॥ ६० ॥ हे हृदय सदासर्वदा यादवतः श्रीमन्नारायणान्मा गाः पृथग् मा भूः etc.

folio 4^b इति नलोदये प्रथमोच्छ्वासस्यावचूर्णिः ॥
folio 9^a इति नलोदये द्वितीयस्योच्छ्वासस्यावचूर्णिः समाप्ता ॥
folio 13^a इति नलोदये तृतीयोच्छ्वासावचूर्णि ॥ छ ॥

Ends.— folio. 16^b

अयं संपदं अहास्तऽगछत् किं अयं उन्मद्दा उद्गततेजाः किं संपदं महा-महा महोत्सवां को भाव । नलस्तां पुरीं पुनरपि प्राप्तः पुनः संपदं लक्ष्मीं प्राप्त इति भावः ॥

इति नारायणसुतरविदेवविरचिते ... ... चूर्णिः समाप्ता ॥

श्री ॥ संवत् १७१७ वर्षे मार्गशिरमासे कृष्णपक्षे तिथौ तृतीयायां लिखिता शुभाख्यद्विजेनश्चंतिरियम् ॥

References.— See No. 315

नारदपञ्चरात्रिरासमण्डल-नित्यविहार

Nāradapañcarātrirāsamaṇḍala-nityavihāra

No. 325

500. (xi).
1899-1915.

Size.— $7\frac{1}{5}$ in. by 6 in.

Extent.— 97^b-100^b leaves ; 12-13 lines to a page ; 25 letters to a line.

Description.— See No. $\frac{440.}{1899\text{-}1915.}$ (गीतगोविंद)

Begins.— fol. 97^b

श्रीराधाकृष्णाय नम कृष्णो जयति ।

नमो नलिननेत्राय वेणुवादविनोदने ।
राधाधरसुधापान शालिने वनमालिने नमः ॥ १ ॥

श्रीब्रह्मोवाच ॥

नारदस्त्वं ऋषीश्रेष्ट विष्णुभक्त दयापर ।
सर्वधर्मार्थतत्वज्ञ तस्मात्वं च मम प्रिए ॥ २ ॥
etc.

Ends.—fol 100^b

मम स्वरूपसमो नास्ति मम लीलाकृतोबल ।
मम देव परं नास्ति त्रैलौक्याधिपति प्रभो ॥ ४६ ॥

इति श्रीवैष्णवपुराणे नारदब्रह्मसंवादे नारदब्रह्मसवादे श्रीनारदपंचरात्रिश्रीरासमंडलनित्यविहारस्मातं संवत १७६३ फाल्गुणमासे कृष्णपक्षे तिथ ७ भौमवासरे लिषतं ।

नीति, शृंगार and वैराग्य शतकs — Niti, Srigara and Vairagya Satakas

No. 326 — 582. 1891-95.

Size.— $8\frac{1}{4}$ in. by $4\frac{1}{6}$ in.

Extent.— 46 leaves; 10 lines to a page; 20 letters to a line.

Description.— Country paper; old in appearance, Devanagari characters; hand-writing bold, clear and uniform; borders ruled in double red and black lines; running and separate pagination for every śataka, incorrect.

Age.— Saṁvat 1659.

Author.— Bhartṛhari.

Begins.—folio. 1ᵇ

॥ श्रीगणेशाय नमः ॥

यां चिंतयामि मनसा मयि सानुरक्ताः ।
सा चान्यामिछति जनं स जनोन्यसक्ता· (क्तः) ॥
अस्मत्कृते च परीतुष्यती काचीदन्या ।
धीक् तां च तं च मदनं च इमां च मां च ॥ १ ॥ etc.

नीतिशतक Ends— folio 13ᵇ

मुर्खत्वं ही सखे ममातीरुचीरं मुर्खस्य चाष्टौगुणा ।
आलस्यं बहुभोजणं मुखरता रात्रौ दिवा सुप्तता ॥
कार्याकार्यवीचारनैकबधीरो मानापमानौ सम
वीधाशास्त्रवीनोदगीतरहीतं मुर्ख सुखं जीवती ॥ १०४ ॥
इति भर्तृहरीनीतिशतक समाप्तः ॥ १ ॥

Then follows an endorsement in Vernacular, by a scribe named Trimbaka.

शृंगारशतक Begins.—fol. 1^a, (14^a)

॥ श्रीगणेशाय नमः ॥

चुडोतंसीतचारुचंद्रकलीका चंचच्छीखाभासुरो ।
लीलादग्धवीलोलकामशलभः श्रेयो दशाग्रे स्फुरन् ॥
अत स्फुर्जीवपारमोहतीमीरह्राग्भारसुछेदयं ।
चेतःसद्मनीयोगीनां वीजयत ज्ञानप्रदीपो हरा ॥ १ ॥ etc.

शृंगारशतक Ends.—fol 14^b, (27^b)

सीहोवलीद्दीरदसुकरमीमांसभोजी संवत्सरेण रतीमेती कलैकवारं ।
पारापतः खगशीलाकणभोजनोपी कामी भवत्यनुदीनं वद कोत्र हेतुः॥१०२
इति श्रीभतृहरीशृंगारशतक द्वितीय शतक संपुर्णमस्तु ॥ २ ॥

वैराग्यशतक Begins.—fol. 1^a, (28^a)

॥ श्रीगणेशाय नमः ॥

दीक्कालाद्यनवछांन्नानतचीन्मात्रमुर्तये ।
स्वानुभुत्यैकमानाय नमः शांताय तेजसे ॥ १ ॥ etc.

वैराग्यशतक Ends.—fol. 18^b (45^b)

अक्रोध वैराग्य जितेंद्रियत्वम् क्षमा दया शांती जयप्रयित्वं ।
निर्लोभ दाता भयशोकहारी ज्ञानस्य चिन्हं दशलक्षणानि ॥ १०५ ॥
इति श्रीभर्तृहरिकृत
इति श्रीभर्तृहरिकृत वैराग्यशतकं संपुर्ण ॥ छ ॥ शके १६५९
पिंगलनामसंवत्सरे ॥ माघे कृष्णे ॥ चतुर्दसी इंदुवासरे भयं शुभदिने लेखनं ॥
समाप्तोयं ॥ भयं पुस्तकं ॥ त्र्यंबकजी गोविंद ॥ वास्तव्य हेमनपुरी ॥ स्वहस्तेन
लि ॥

References.— 1 Aufrecht's Catalogus Catalogorum Part I, page— 397^a Part II, page— 90^a, 214^a Part III, page— 85^b-86^a Described in many Catalogues.

2 Winternitz – History of Indian Literature Vol. III page— 137.

3 A. B. Keith— History of Sanskrit Literature page— 175f.

4 Printed Editions— Numerous editions of this work are printed both in India and outside.

नीति, शृंगार and वैराग्य शतकs — Nīti, Sṛṅgāra and Vairāgya Śatakas

No. 327 — 72. 1871–72.

Size.— 11 in. by $5\frac{1}{5}$ in.

Extent.— 17 leaves ; 14–15 lines to a page ; 42 letters to a line.

Description.— Country paper ; whitish in appearance ; Devanagari characters ; hand-writing clear, legible and uniform पृष्ठमात्राs rarely used ; borders and edges ruled in red lines.

Age.— Saṁvat 1853.

Author.— Bhartṛhari.

Begins.— folio 1^b

॥ अर्हं ॥ चूडोत्तंसित etc. as in No. 326 followed by

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।

ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रंजयति ॥ २ ॥ etc.

नीतिशतक Ends .— folio. 6^b

केयूरा न विभूषयंति etc. up to भूषणं as in No. 330 below followed by यदि नाम दैवगत्या जगदसरोजं कदाचिदपि आतं ।

अवकरति करं विकिरति तत्किं कृकवाकुरिव हंसः ॥ ३ ॥

इति नीतिशतकं समाप्तितां पफाणालि । श्रीमुक्तिसौभाग्यवाञ्चकैः शि । मु कल्याणसौभाग्य । कृते श्रीमुम्माई वं । रे

शृंगारशतक Begins.—fol. 7^a

अर्हं ॥ शुभ्रं धाम सविभ्रमायुवतयः श्वेतातपत्रोज्वला ।

लक्ष्मीरित्यनुभूयते स्थिरमिव स्फीते शुभे कर्मणि ॥

विछिन्ने नितरामनंगकलहक्रीडात्रुटत्तंतुकं ।

मुक्ताजालमिव प्रयाति झटिति भ्रश्यद्दिशो दृश्यतां ॥ १ ॥ etc.

शृंगारशतक Ends.—fol. 11[b]

यद्यस्य नाभिरुचितं न तत्र तस्य स्पृहा मनोज्ञेपि ।
रमणीयेपि सुधांशौ नलिनीनानुरागमाधत्ते ॥ १०१ ॥

इति श्रीशृंगारशतकं द्वितीयं समाप्तिं पफाण श्रीरस्तु ।शि । कल्याण-
सौभाग्य । पठनकृते लिखितम् ॥

वैराग्यशतक Begins.— folio. 12[a]

॥ अर्हं ॥ दिक्कालाद्यनवच्छिन्ना etc. as in No 326

वैराग्यशतक Ends— folio 17[b]

यां चिंतयामि etc. as in No. 326

followed by इति वैराग्यशतक तत्समाप्तौ समाप्तो ग्रंथः भर्तृहरिणा
कृत' श्रीमुक्तिसौभाग्यगणिभिः शिष्यकल्याणसौभाग्यगपठनकृते सं १८५३
वर्ज्येत ६ रवौ श्रीशांतिजिनप्र । श्रीमुम्भाइ बंद २

अतर्वसति मांजारी शुनी वा राजमंदिरे ।
अधस्तात्ते गजेंद्राणां क्रीडादलितविद्विषां ॥ १ ॥

References.— See No. 326

नीति, शृंगार and वैराग्य
शतकs

Nīti, Sṛṅgāra and Vairāgya
Śatakas

No. 328

495.
1899-1915.

Size.— 9 in. by 4 in.

Extent.— 26 leaves ; 8 lines to a page ; 28 letters to a line.

Description.— Country paper ; old but well preserved ; Devanāgarī characters ; beautiful and uniform hand-writing ; पृष्ठमात्राs used ; borders ruled in two double black lines ; red pigment used ; folios 1-29 missing ; incomplete.

The Ms. contains only 2 verses from the शृंगारशतक and the वैराग्यशतक. The Ms. was written by one नृसिंह a resident of शंकरपुर in Saṁvat 1617 i. e. A. D. 1561.

Age.— Samvat 1617

Author.— Bhartrhara(-11).

Begins.— folio. 30ª

... ... नरतास्त्यक्तसंसारसंगा ।
ब्रह्मज्ञाने विलीना गिरिवरगहने यौवनं यापयंते ॥
ये तु प्रोत्तंगपीनस्तनकलशभराक्रांतकायां दिनांते ।
कांतामालिंग्य कंठे मृदुशयनतले शेरते तेपि धन्या ॥ etc.

folio 30ª इति श्रीभर्तृहरविरचितं द्वितीयं शृंगारशतकं संपूर्ण ॥

Ends.—folio. 55ᵇ

यद्यस्य नाभिरुचितं न तत्र तस्य स्पृहा मनोज्ञेपि ।
रमणीयेपि सुधांशौ ननाम काम· सरोजिन्याः ॥ ६२ ॥

इति श्रीभर्तृहरविरचितायां चरमं वैराग्यशात संपूर्ण ॥

श्रीरामनाम जपतां युधि धीरवीर ।
कोटीरहीरनृपते निरयोपभोगः ॥
विद्वन् विचारय चिर रुचिरं स्वचित्ते ।
स्वप्नेपि दुर्लभतमः कतमः पदार्थः ॥ १ ॥ श्री ॥ श्री ॥

शुभं भवतु ॥ कल्याणमस्तु ॥ श्रीरस्तु ॥ सर्वजगतः ॥ कृष्णाय नमः
संवत् १६५७ वर्षे वैशाष(ख) मासे कृष्णपक्षे एकादश्यां तिथौ भौमवासरे
लिखितमिदं व्यासश्रीनृसिंहेण शंकरपुरवासिना ॥

References.— See No. 326

नीति, शृंगार and वैराग्य शतकs Niti, Srngāra and Vairāgya Satakas

No. 329 581. 1891-95.

Size.—$8\frac{2}{5}$ in. by $4\frac{4}{5}$ in.

Extent.— 25 leaves ; 12 lines to a page ; 32 letters to a line.

Description.— Country paper ; old in appearance ; Devanāgarī characters ; hand-writing clear legible and uniform ;

red pigment used for verse-numbers; corners of folios extremely damaged; colophons in red ink.

The Ms. contains all the three śatakas. The last is called the *yogaśataka*.

Age.— Samvat 1831.

Author.— Bhartrhara(-ri).

नीतिशतक Begins.— folio. 1[a]

श्रीगणेशाय नम ॥

यां चिंतयामि etc. as in No 326

नीतिशतक Ends.—folio. 8[b]

उदग्रा योवनयोगाः कुरुपं रुपमाधत्ते।

तथा तथाव्ययेकेलिंग्रा अपि च माधुर्य ॥ ११० ॥

इति भर्तृहराधिरचितं ॥ नीतिशतकं ॥

शृंगारशतक Begins.— folio 8[b]

चूडोत्तंसित etc as in No. 326

शृंगारशतक Ends.—folio 16[a]

यद्यस्यनास्ति रुचितं etc. as in No. 327

followed by इति श्रीभर्तृहरविरचितं शृंगारशतसमाप्तम् ॥

वैराग्यशतक Begins.—folio 16[a]

दिक्कालाद्यनवाछिन्न etc. as in No. 326

वैराग्यशतक Ends.— folio 25[a]

ये वर्द्धंते धनपतिपुरुषाः प्रार्थनादुःखभाजो।

ये चाल्पत्वं दधति विषयाक्षेपपर्यस्तबुद्धेः ॥

तेषामंतस्फुरितहासितं वाराणां(?) स्मरेयं।

ध्यानछेदे शिखरीकुहरग्रावं शिय्यां निषक्तः ॥ ७ ॥

इति श्रीभर्तृहरविरचितं योगशतकं समाप्तः ॥ शुभं भवतु ॥ श्रीयं चास्तु ॥ अविघ्नमस्तु ॥ संवत ॥ १८३१ ॥

References.— See No. 326

नीतिशतक Nītiśataka

No. 330 242. / Viśrāma (i).

Size.— $8\frac{1}{4}$ in. by 4 in.

Extent.— 12 leaves; 9 lines to a page; 28 letters to a line.

Description.— Modern paper with water-marks, Devanāgarī characters; hand-writing clear, legible and uniform; folios numbered in both margins.

The Ms. contains only the *Nītiśataka*.

Age.— A modern copy.

Author.— Bhartrhara(-rī).

Begins.— folio 1[b]

श्रीगणेशाय नमः ॥

यां चिंतयामि etc. as in No. 326

Ends.— folio 12[b]

केयूरा न विभूषयंति पुरुषं हारा न चंद्रोज्वला ।
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः ॥
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते ।
क्षीयंते खलु भूषणानि सततं वाक्भूषणं भूषणं ॥ १०२ ॥

इति भर्तृहरविरचिते नीतिशतकं संपूर्णं समाप्तं ॥

॥ इदं पुस्तकं पटवर्धनोपनामक आपाभट्टेन लिखितं ॥

References.— See No. 326

नीति, वैराग्य and शृंगार शतकs with टीका — Niti, Vairagya and Srngara Śatakas with Commentary

No. 331 487. / 1895-1902.

Size.— $9\frac{3}{5}$ in. by $4\frac{1}{3}$ in. }
12 in. by 6 in. }

Extent.— 60 leaves ; 11–12 lines to a page ; 25-30 letters to a line.
8 & 10 „ „ „ „ 44 „ „ „ „

Description.— Country paper ; old in appearance ; Devanāgarī characters, नीतिशतक smaller in size ; letters clear and legible, वैराग्य and शृंगार शतकs bigger in size ; hand-writing of the text bold, of the comm. very small ; borders of both ruled in red lines ; edges of foll. 18-21 of वैराग्यशतक moth-eaten ; separate pagination for each śataka ; the hand-writings of the नीतिशतक and of other two śatakas are different.

Age.— The Ms. appears to be old.

Author of the text.— Bhartṛhari.

„ „ „ comm.— Dhanasāra.

नीतिशतक Begins.— folio 1ᵇ

Text-- दिक्कालाद्यनवाछिन्न etc. as in No. 326

Com.-- ॐ श्रीगणेशाय नमः ॥ श्रीवैकुंठाश्रमस्वामीचरणार्विंदाय नमः ॥ॐ॥
नीतिशतकं प्रारंभः ॥

पंचायुधस्य परिपंथ्यपि वाममर्थं भक्तानुकंपनतया हिमवद्दुहित्रे ।
योऽदात्तमीशमभिवन्द्य वदामि टीकां ग्रंथस्य भर्तृहरिणा शतकत्रयस्य ॥१॥ etc.

नीतिशतक Ends.—folio 22ᵃ

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः ।
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किं ॥
सौजन्यं यदि किं निजैस्वमहिमा यद्यस्ति किं मंडनैः ।
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥ ४ ॥

Com— यः विद्वान् तं सर्वेपि वित्तैः पूजयंतीत्यर्थः अपयशो दुष्कीर्ति यद्यस्ति तदानीं मृत्युना मरणेन किं ॥ अपयशो एव मृत्युरित्यर्थः ॥ ४ ॥

folio 3ᵇ of वैराग्यशतक-इति श्रीभर्तृहरविरचिते प्रथमं नीतिशतकं व्याख्या संपूर्ण ।

वैराग्यशतक Begins.—folio 1ᵃ

श्रीगणेशाय नमः ॥ अथ वैराग्यशत प्रारंभः ॥
दिक्कालाद्यनवछिन्न etc. as in No. 326

Com.— (folio 3^b) अथ वैराग्यशतकटीकायां प्रारभ्यते अथ शांतितेजसे न नमस्कारवर्णनमाह १ etc.

वैराग्यशतक Ends.—folio 21^b

अनावर्त्ती कालौ व्रजति स वृथातन्तागणितं ।
दशास्तास्ताः सोढा व्यशसनशतसपातविधुराः ॥
कियद्वा वक्षामः किमिव च तदात्मन्युपकृतं ।
वयं यावत्तावत्पुनरपि तदेव व्यवसितं ॥ १३६ ॥

इति श्रीभर्तृहरिकृतवैराग्यशतक संपुर्णम संवत् १८९१

Com.—fol. 19^a शेषमायु व्याधिवियोगशोकसहित सेवादिभि कर्मभिर्नीयते किं जीवे जीवितव्ये वारितरंगचंचलतरे वारिणि समुद्रस्य तरंगास्तद्वच्चंचलतरे इत्यर्थः १० इति श्रीभर्तृहरकाव्ये वैरागशतकटीका संपूर्ण २

शृंगारशतक Begins.—fol. 1^b

अथ शृंगारशत लिख्यते ॥

Text— चूडोत्तंसित etc. as in No. 336

Com.—folio 19^a अथ शृंगारशतकव्याख्या प्रारभ्यते तत्र प्रथम चरण स्मरण प्रथमकाव्यमाह etc.

Ends.—folio 17^b

Text— अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा ।
मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा ॥
तृणे वा रेणौ वा मम समदृशो यांति दिवसाः ।
क्वाचित् पुण्ये रण्ये शिव शिव शिवेति प्रलपतः ॥ ११९ ॥

इति श्रीभर्तृहरकृतं शृंगारशतकं संपूर्णम् ॥

Com.—fol. 15^b सरोजिन्याः कमलिन्याः सुधांसौ चंद्रे कामो न भवति उदासीन स्यात् किं विशिष्टः शुद्धांशौ रमणीये मनोज्ञे इत्यर्थः शेषं सुगमं १०५

केशगनांण(?)दीप्तिभानोः श्रीसिद्धसूरिसुगुरो महिमाधिकस्य ।
शिष्येण तस्य धनसारवरेण रम्या टीकेयमद्यमतनु भर्तृहरिं व्यधत्त ॥
श्रीसिद्धसूरिगुरु सन्निहतप्रतापादछकाविस्वमतिमाप्य विकारहृष्टा ।
रम्येह भर्तृहरकाव्यवरस्य टीका श्रीपाठकेन विदधे धनसारनाम्ना ॥२॥
इति श्रीभर्तृहरकाव्यस्य द्वितीय शृंगारशतक टीका संपूर्णम् ० ० ०

References.— Aufrecht: Catalogus Catalogorum— i, 397; ii, 90; iii, 86.

I. O. Cat. part VII, No. 4001 describes a Ms. of this commentary on *Vairāgyaśataka* and the comm. on the Nītiśataka and Vairāgyaśataka is described by R. Mitra in his Notices Vol. VIII Nos 2734 and 2738.

नीति and शृंगार शतकs	Nīti and Śṛṅgāra śatakas
with	with
टीका	Commentary
No. 332	277. / 1883–84.

Size.— 10 in. by $4\frac{1}{4}$ in.

Extent.— 41 leaves; 15 lines to page, 38 letters to a line.

Description.— Country paper; old and brittle; Devanāgarī characters; hand-writing clear and uniform; some portion not legible, being scratched out; borders ruled in double black lines; red pigment used; separate pagination for each śataka.

Some Persian letters are to be seen on fol. 20ª.

Age.— The Ms. appears to be old.

Author of the text.— Bhartṛhari.

" " " comm.— Dhanasāra.

Begins.—folio 1ᵇ

Text— यां चिंतयामि etc. as in No. 326

Com.— ॥ ए ॥ युगादिदेवोप्ययुगादिदेवः ।
युरा द्वितीयोपि सदा द्वितीयः ॥
पंचशाखोपि सहस्रशाखः ।
सो मंगलो मंगलमातनोतु ॥ १ ॥

सर्व्वातिशयसंयुक्तं पंचाचारपरायणं ॥
श्रीविरंगरिमाधीरमभिवंदे महात्मभिः ॥ २ ॥
नत्वार्हतं गुरुं देवीं सारदां कवि सारदं ॥
श्रीमद्भर्त्तृहरवृत्तव्याख्यां विरचयाम्यहं ॥ ३ ॥

Ends.— folio. 19[b]

नीतिशतक Text— यदिनाम दैवगत्या etc. as in No. 327

Com.— मम इति संबोधने यदि चेत् कदाचिदपि दैवगत्या जगदाम्भोजं ... ... कमलं जातं तत्किं हंसः राजहंसः अभवत् ... ...

श्रीसिद्धसूरिगुरुसंनिहितधनपान्नश्वकृति ... प्राप्यति ... ... व्यवरस्य टीका श्रीपाठकेन विदधे घनसारनाम्ना इति श्रीप्रथमशतकस्य नीतस्य टीकेयं समाप्तं ॥

शृंगारशतक Begins.— folio 1[a]

Text— चूडोत्तंसित etc. as in No. 326

Com.— हरो महेशः योगिनां अवगतत्त्वाविचारिणां चेतः सद्मनि मानसमंदिरे विजयते etc.

Ends.—folio 21[a]

शृंगारशतक Text— यद्यस्य नाभिरुचितं etc. as in No. 327

Com.— सरोजिन्याः कमलिन्याः सुधांशौ चंद्रमसि कामो न भवति । उल्लासो न स्यात् । किं सुधांशौ रमणीयेपि ॥ १०५ ॥

अकेशागच्छगगनां etc. ... ... up to भर्तृहरी व्यधायि ॥ १ ॥
as in No. 331

followed by इति श्रीभर्तृहरकाव्यस्य द्वितीयशतकस्य टीकेयं विदधे ॥ संपूर्णमस्ति । लिषातं पूजा श्रीमानजी सत्यं ॥ श्री ॥

Then follow the following stanzas.

संतप्तादशमेद्वव्याद्विगतिना सम्मूर्छिता निर्जले ।
तूर्यंद्वादशवद्वितीयमतिमश्चैकादशामंस्तती ॥
साषष्टीनृपपंचमस्य नवमभ्रः सप्तम वर्जिता ।
प्राप्नोत्यष्टमवेदनां तदधुना तूर्णं तृतीयी भव ॥ १ ॥
कौलकौतिराधरेवो । मोरोहंसो अलोदरी ॥
कंसारीरातिक्षीडीबो । वागलो लोकलोचनु ॥ २ ॥

आसादयति यद्रूपं करेणुर्व्यंजनैर्विना ॥
तत्ते कमलपत्राक्षि । भवत्वक्षयमक्षयं ॥ ३ ॥
शरीरं विगताकारं । अनुस्वाराविवर्जिते ॥
यादृशं जायते रूपं । तत्ते भवतु सर्व्वदा ॥ ४ ॥
खाटपातदृषलाटनगारी । डाभलाभकरवातहुडाटा ।
एत आशु तव कीर्तिपतुष्टां । गामसीमविहितां प्रदिशंतु ॥ ५ ॥
घररडोलतदीनथों । जनजन मंगतजाइ ।
दीयै लोभ च समाचषुनि । लघुफुनिव मौलषाइ ॥ ६ ॥
तिमिरारि तमो हंति । शंकातंकितमानसाः ।
वयं काका वयं काका । इति जल्पंति वायसाः ॥ ७ ॥

References.— See No. 331

शृंगार and वैराग्य शतकs with टीका

Śṛṅgāra and Vairāgya śatakas with Commentary

No. 333 391. / 1892-95.

Size.— 10 in. by 4½ in.

Extent.— 34 leaves; 17 lines to a page; 40 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing small, but clear and legible; borders ruled in triple red lines and edges in single; red pigment used.

Folios 1-18 which probably contained the नीतिशतक, are wanting.

Age.— The Ms. appears to be old.

Author of the text.— Bhartṛhari.

,, ,, ,, comm.— Dhanasāra.

Begins.—folio 19ª

शृंगारशतक Text-- मोहतिमिरप्राग्भारमुच्छेदयन् ।
चेतः सद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ १ ॥

Com.— चूडेति । हरो महेशो योगिनामवगततत्वविचाराणां चेतः सद्मनि मानस-मंदिरे विजयते etc.

शृंगारशतक Ends.— folio 34[b]

Text— यदस्य नाभिरुचितं etc. as in No. 327

Com.— सरोजिन्याः कमलिन्याः सुधांशौ चंद्रमसि कामो न भवति ॥ उल्लासो न स्यात् किं सुधांशौ रमणीयेपि ॥ १०० ॥

श्रीकेशगछ etc. up to घनसारनाम्ना as in No. 331

followed by इति श्रीभर्तृहरकाव्यस्य द्वितीयशतकस्य टीका समाप्ता ॥ २ ॥

बालेबालमृणालकोमलभुजे मत्तालिमालालके ।
लीलांदोलितलोललोचनयुगे तत्वेति यामो वयं ॥
इत्याकर्ण्य वचांसि सा विरहिनी नेत्रांबुधावानती ।
एणाक्षी परिपूर्णचंद्रवदनी निश्वस्य मोहं गता ॥ ३ ॥ श्रीः ॥

वैराग्यशतक Begins.— folio 35[a]

अथ वैराग्यशतकमाह ॥

Text— दिक्कालाद्यनवाछिन्न etc. as in No. 326

Com.— दिक्कालेति । तस्मै शांताय तेजसे परब्रह्मणे नमः etc.

Ends.— folio 51[b] 52[a]

Text— आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं ।
तस्यार्द्धस्य कदाचिदर्द्धमधिकं वृद्धत्वबाल्ये गतं ॥
शेषं व्याधिवियोग दुक्खसहितं सेवादिभिर्नीयते ।
जीवे वारितरंगचंचलतरे धर्म्मः कुतः प्राणिनाम् ॥ ८ ॥

Com.— वारितरंगचंचलतरे वारिणः समुद्रस्य वारितरंगास्तद्वच्चंचलतरावा॰ तस्मिन् ॥ ८ ॥ इति वैराग्यशतक तृतीय समाप्तमिति ॥

इति भर्तृहरविरचिते समाप्तम् तृतीय शतकम् ॥

Then follow some 20 verses.

References.— See No. 331

नीति, शृंगार and वैराग्य-शतकटीका

Nīti, Sṛṅgāra and Vairāgya-śatakaṭīkā

No. 334 353. / 1892-95

Size.— $8\frac{1}{4}$ in. by $4\frac{3}{4}$ in.

Extent.— 51 leaves; 14-15 lines to a page, 40 letters to a line.

Description.— Country paper; Devanāgarī characters; hand-writing very small, but clear, legible and uniform; borders on all sides ruled in double red lines and edges in single; red ink used for प्रतीकs in the comm.; fol. 6^b and 32^b blank.

The नीतिशतक contains some verses from the text.

Age.— Samvat 1855.

Author.— Dhanasāra.

Begins. – folio 1^b

॥ श्रीगणेशाय नमः ॥

Text—यां चिंतयामि etc. as in No. 326

Com.— ॥ ६० ॥ श्रीगणेशाय नमः ॥ अथ भर्तृहरस्य टीका प्रारभ्यते ॥

युगादिदेवोप्ययुगादिदेवः पुरा द्वितीयोपि सदा द्वितीयः ।

यः पंचशाखोपि सहस्र शाखः ॥ सो मंगलो मंगलमातनोतु ॥ १ ॥

सर्वातिशयसंयुक्तं पंचाचारपरायणं ।

श्रीवीरं गुरुनागारं । महात्मानं नमाम्यहं ॥ २ ॥

नत्वार्हतं गुरुं देवीं शारदां कविशारदां ।

श्रीमद्भर्तृहरेर्व्याख्यां शुद्धां विरचयाम्यहं ॥ ३ ॥ etc.

नीतिशतक Ends – folio 7^b

Text— पातितोपि कराघातैरुत्पतत्येव कंदुकः ।

प्रायेण साधुवृत्तानामस्थायिनो विपत्तयः ॥

Com.— folio 19^a यथा ककवाकुरवकरनिकरं विकरति तथा राजहंसो न इत्यर्थः ॥ १०४ ॥

इति श्रीभर्तृहराविरचिते प्रथमं नीतिशतकं व्याख्या संपूर्णं ॥

शृंगारशतकटीका Begins.—folio 19^a

अथ शृंगारशतकं व्याख्या प्रारभ्यते ॥ तत्र प्रथमहरचरणस्मरण प्रथम

काव्यमाह ॥ हरो महेशो योगिनामवगततत्वविचाराणां चेतः सद्मनि मानस-
मंदिरे विजयते etc.

शृंगारशतकटीका Ends.— folio 36[a]

सरोजिन्याः कमलिन्याः etc. up to श्रीपाठकेन विदधे धनसार-
नाम्ना ॥ २ ॥ as in No. 331

followed by इति श्रीभर्तृहरकाव्यस्य द्वितीय श्रृंगारशतकटीका
संपूर्णमगमत् ॥ २ ॥

वैराग्यशतकटीका Begins.— folio. 36[a]

अथ तृतीय वैराग्यशतकटीकायां प्रारभ्यते ॥
अथ शांतितेजसे नमस्कारवर्णनमाह ॥ १ ॥ चोङ्कारो इति ॥ etc.

वैराग्यशतकटीका Ends.--folio. 51[b]

शेषमाशु etc up to चंचलतरे इत्यर्थः ॥ ११० ॥
as in No. 331

followed by इति श्रीभर्तृहरकाव्ये तृतीय वैराग्यशतकटीका संपूर्ण ॥
यादृशं पुस्तकं दृष्ट्वा । तादृशं लिखितं मया ॥
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ १ ॥
लिखितं गंगाविशनब्राह्मणज्ञाति पुरोहित सवाई जयपुरमध्ये स्वपठ-
नार्थम् मिती वैशाख कृष्ण १२ संवत् १८५५ का शुभम् ॥

References.— See No. 331

नीति, शृंगार and वैराग्य-शतकs with टीका | **Nīti, Sṛṅgāra and Vairāgya-śatakas with Commentary**

No. 335 | 73. / 1871-72.

Size.— 10⅜ in. by 4⅝ in.

Extent.— 51 leaves ; 20-21 lines to a page ; 50 letters to a line.

Description.— Country paper ; old but well preserved ; Devanāgarī characters ; hand-writing very small but clear and legible ; पृष्ठमात्राs used ; borders ruled in double red lines and edges

in single; red pigment used for verse-numbers and yellow mixed with black colour used for corrections.

Age.— The Ms. appears to be old.

Author of the text.— Bhartrihari.

„ „ „ comm.— Rāmarsi.

Begins.-- folio. 1^{b}

॥ ए० ॥ ॐ नमः श्रीपार्श्वप्रभवे ॥ श्रीगणेशाय नमः ॥

नीतिशतक Begins Text—चूडोत्तंसित etc. as in No. 326

Com.-- हरः विजयते । श्रीशिवः सर्वोत्कर्षेण वर्त्तते किं लक्षणो हरः ज्ञानप्रदीपः प्रदीप इव ज्ञानं यः सः etc.

नीतिशतक Ends.— folio. 14^{b}

Text-- यदि नाम दैवगत्या etc. as in No. 327

Com.-- हंसो मरालः कृकवाकुरिव कुर्कुट इव अवकरनिकरं समूहं विकिरति विक्षिपति । अपि तु ॥ इति श्रीभर्तृहरकृतं नीतिशतकं सभाष्यं संपूर्णम् ॥

शृंगारशतक Begins.—folio 15^{a} ॥ श्रीगणेशाय नमः ॥

Text— चूडोत्तंसित etc. as in No. 326

Com.-- योगिनां चेतः सद्मनि चित्तगृहे । ज्ञानप्रदीपो हरः विजयते । etc.

शृंगारशतक Ends.-- folio. 29^{b}

Text— यद्यस्य नाभिरुचितं etc. as in No. 327

Com.-- अमृतकिरणे चंद्रमसि नलिनी श्रीसूर्यवश्य कमलिनी । अनुरागं प्रेम न आधत्ते न आदधाति । तं नावलोकयतीत्यर्थः । एतेन नीतिशृंगारवैराग्येषु मध्ये यस्य यत् अभिरुचितं स तत्रासक्तो भवतीत्यर्थः ॥

इति श्रीमहाकविचक्रचूडामणिना भर्तृहरिणा विरचितं श्रृंगारशतं द्वितीयं संपूर्णम् ॥

वैराग्यशतक Begins— folio 30^{a}

श्रीरस्तु ॥ श्रीगणेशाय नमः ॥

Text— दिक्कालाद्यनवच्छिन्न etc. as in No. 326

Com.— दिक् च कालश्च दिक्कालौ वेदांतिनां मते व्यापकौ पदार्थौ etc.

वैराग्यशतक Ends.—folio. 51ª

Text— यां चिंतयामि etc. as in No. 326

Com.— एतेन कामकामिनां मोहकमोहितत्वेन निंद्यत्वमिति भावः

followed by सिंहोबलीद्विरदशूकरमांसभोजी ।

संवत्सरेण रतिमेति किलैकवारं ॥
पारापतः खरशिलाकणमात्रभोजी ।
कामी भवत्यनुदिनं वद कोऽत्र हेतुः ॥ १०६ ॥

चक्रे भर्तृहरिकृतोर्यथामति सविस्तरं ।
रामार्षिर्विवृतिं व्यस्यन् । विदां चित्तप्रसत(क्त)ये ॥ १०७ ॥

इति श्रीमहामुनींद्रभर्तृहारिकृतौ वैराग्यशतकस्य टीका समाप्ता ॥

॥ भर्तृहरिकाव्यवृत्तिः सूत्रान्विता ३७५० ग्रंथमाना ॥ श्रीरस्तु ॥ श्री ॥

References.— Aufrecht-Catalogus Catalogorum, 1, 397ᵇ.

नीति, शृंगार and वैराग्य-शतकs with टीका

Nīti, Śṛṅgāra and Vairāgya-Śatakas with Commentary

No. 336 18. 1868-69.

Size.— $9\frac{1}{3}$ in. by $4\frac{3}{4}$ in.

Extent.— 64 leaves; 12-13 lines to a page; 30-40 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing clear, legible and uniform; borders ruled in double red lines; a tripāṭhī Ms., separate pagination for every *śataka*; folio number 16 repeated.

Age.— The Ms. appears to be old.

Author of the text.— Bhartṛhari.

,, ,, ,, comm.— Anonymous.

Begins.—folio. 1ᵇ

ॐ ॥ श्रीगणेशाय नमः ॥

Text— दिक्कालाद्यनवच्छिन्न etc as in No. 337 below

followed by यां चिंतयामि ec. as in No. 326

॥ श्रीगणेशाय नमः ॥

Com.— विघ्नेशं विघ्नहर्त्तारं etc. up to करोम्यहं as in No. 337 followed by दिगिति दशदिशासु तथा भूतभविष्यवर्तमानत्रिकालेषु अनवच्छिन्नाः etc.

नीतिशतक Ends.— folio. 22[a]

Text— लज्जागुणौघ etc. as in No. 337

followed by इति भर्तृहरिणाकृतं नीतिशतकं समा–

Com.— स्वां स्वकीया जननीमिव अत्यंतशुद्धहृदयामनुवर्तमानामनुकरोति अतः स्तेजस्विनः सुखमसू—

शृंगारशतक Begins.— folio 1[b]

॥ श्रीकृष्णाय नमः ॥

Text— शंभुस्वयंभु etc. as in No. 337

Com.— श्रीगणेशाय नमः अथ शृंगारशत प्रारंभः परंतु नाम्ना सम्यग्विचारितं etc. ... ...

शृंगारशतक Ends— folio 23[a]

Text— यद्यस्य नास्ति etc. as in No. 327

followed by इति भर्तृहरिणाकृतं शृंगाररसवर्णनं शृंगारशतं समाप्तं ॥

Com.— तासां कामिनीनां प्रशंसा कामिभिः क्रियते सा लिखता प्रांते सर्वं विवेकद्दष्ट्वा निक्षितम् १०० इति भर्तृहरिणा विरचितं टीकायां शृंगारशतं समप्ता ।

वैराग्यशतक Begins.—folio. 1[b]

श्रीकृष्णाय नमः

चूडोत्तंसित etc. as in No. 326

Com.— ॥ श्रीगणेशाय नमः अथ वैराग्यशत प्रारंभः योगिनां चेतः सद्मनि चेत मन एव सद्मनिग्रहे ज्ञानमेव प्रकर्षेण दीपो यस्य एवं भूतो हरः विजयते ॥ etc.

वैराग्यशतक Ends—folio 18[b]

Text— भूः पर्यंको निजभुजलता कंदुकं खं वितानं ।

दीपश्चंद्रः क्षमतिवनितालब्धसंगप्रमोदः ॥

दिक्कांताभिः पवनचमरै(ः)वीज्यमानः समंता—।
भिक्षुः शेते नृप इव भुवि त्यक्त सर्वस्पृहोपि ॥ ८६ ॥

इति भर्तृहरिणाकृतं वैराग्यशतकं समाप्तिं पफाणाः श्रीमथुराजीमधे राम-घट श्रीराधाकृष्णाय नम· श्रीगोपीजनवलभ(भा)य नमः ॐ नम

com.-- एवं यस्य वैराग्ये या सामग्री तस्य त्रैलोक्यराज्येन किं ८५, ८६ इति श्रीभर्तृहरिणा विरचितं टीकायां वैराग्यशतं समाप्तं समाप्तोयं भर्तृहर-शतकं सभाष्यः श्रीकृष्णाय वासुदेवाय देवाय देवकीनंदनाय

References.— See No. 326

नीति and शृंगार शतकs with टीका — Niti and Sringāra Satakas with Commentary

No. 337 — 643. 1883-84.

Size.— $10\frac{1}{8}$ in. by 5 in.

Extent.— 28 leaves; 13 lines to a page; 30-34 letters to a line.

Description.— Country paper; old in appearance, Devanāgarī characters; hand-writing clear and legible; text in the middle with the comm. above and below it, borders ruled in triple red lines; separate pagination for each *śataka*; incomplete.

The Ms. contains the नीतिशतक and 50 stanzas of the शृंगारशतक.

Age.— The Ms. appears to be old.

Author of the text.— Bhartṛhari.

,, ,, ,, comm.— Anonymous.

Begins— folio 1ª

Text— दिक्कालाद्यनवच्छिन्नानंतचिन्मात्रमूर्तये ॥
स्वानुभूत्यैकसाराय नमः शांताय तेजसे ॥ १ ॥
यां चिंतयामि etc. as in No. 326

श्रीगणेशाय नमः ॥

Com.— विघ्नेशं विघ्नहर्तारं गणराजं नमाम्यहं ॥
शारदां वरदां नौमि जाड्यापनुतये तथा ॥ १ ॥
श्रीगोपाल नमस्कृत्य मत्वा गुरुपरंपरान् ॥
भर्तृहरिणा कृतो ग्रंथस्तस्य व्याख्या करोम्यहं ॥ २ ॥
